# Code No. 3806

**CLASS : 11th (Eleventh)** **Series : 11/Annual Exam. -2026**

रोल नं० ☐☐☐☐☐☐☐☐☐☐

## संस्कृत

(Only for Fresh/School Candidates)

समय : 3 घण्टे ] [ पूर्णांक : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

**निर्देशः —**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।



www.mseducationtv.com

## खण्डः 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत —

भारतीया संस्कृति संस्कृतभाषां आश्रित्य तिष्ठति। भारतस्य आत्मा संस्कृत्या प्रकाशते। संस्कृतभाषायाः पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येके क्षेत्रे संस्कृतस्य प्रयोगः भवेत्। संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत्। विदेशेभ्यः छात्राः अध्ययनार्थं अत्र आगच्छन्ति स्म। नालन्दा-तक्षशिला-आदि विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म। पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीय एव।

***प्रश्नाः*** –

(अ) एकपदेन उत्तरत (केवलं प्रश्न***द्वयम्***) – $2 \times 1 = 2$

(i) भारतस्य किम् संस्कृत्या प्रकाशते ?

(ii) छात्राः कुतः अध्ययनार्थं अत्र आगच्छन्ति स्म ?

(iii) विश्वगुरुं प्राप्तुं भारतेन कस्य अवलम्बनं करणीय एव ?

(ब) पूर्णवाक्येन उत्तरत (केवलं प्रश्न***द्वयम्***) – $2 \times 2 = 4$

(i) संस्कृतभाषायाः पुनरुज्जीवनं कदा भविष्यति ?

(ii) केषु विद्यालयेषु विविधानि शास्त्राणि पाठ्यन्ते स्म ?

(iii) कदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत् ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत (केवलं प्रश्न***त्रयम्***) – $3 \times 1 = 3$

(i) "आश्रित्य" इत्यस्य शब्दस्य विलोमपदं किम् ?

(क) आश्रय (ख) निराश्रय

(ग) निराश्रित्य (घ) आश्रम

(ii) "संस्कृतस्य' इत्यस्मिन् शब्दे का विभक्तिः ?

(क) प्रथमा (ख) षष्ठी

(ग) तृतीया (घ) पंचमी

(iii) "विविधानि शास्त्राणि" अत्र विशेष्यपदं किम् ?

(क) शास्त्राणि (ख) शास्त्र

(ग) विविध (घ) विविधानि

(iv) "भविष्यति" इत्यस्मिन् शब्दे कः लकारः ?

(क) लट् (ख) लोट्

(ग) लृट् (घ) लङ्



www.mseducationtv.com

## खण्डः 'ख'

### (रचनात्मक-कार्यम्)

**2.** राजेशः 'छात्रावास-जीवन' विषये पितरम् प्रति पत्रमेकम् लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु — 5

(i) ............... पितः,

सादरं नमो नमः।

अहं गृहात् प्रस्थाय अमृतसरनगरे (ii) ............... अवतीर्य रिक्शायानेन छात्रावासम् सुखेन प्राप्तः। अस्मिन् कक्षे वायोः प्रकाशस्य चागमनाय (iii) ............... तिष्ठन्ति। अत्र पानाशनयोः सुप्रबन्धः। प्राङ्गणे वयस्यैः सह यदाकदाचित् स्थित्वा (iv) ............... अनुभवामि। चिन्ता न कार्या। मातृपादयोः (v) ............... अस्तु।

https://www.haryanaboard.com

भवदीयः पुत्रः

राजेशः।

मञ्जूषा

| |
|---|
| वातायनानि, प्रणामः, रेलयानात्, पूज्यपाद, गोष्ठीसुखम्। |

### (छन्द-अलङ्कार-परिचयः)

**3.** अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया पूर्णवाक्येन लिखत (केवलं प्रश्नत्रयम्) — $3 \times 2 = 6$

(क) अनुष्टुप्-छन्दसि कति वर्णाः सन्ति ?

(ख) उपेन्द्रवज्रा-छन्दसः उदाहरणं किम् ?

(ग) इन्द्रवज्रा-छन्दसः लक्षणं किम् ?

(घ) ............... मालिनी भोगिलोकैः। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

**4.** अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत (केवलं प्रश्नत्रयम्) — $3 \times 2 = 6$

(क) अनुप्रास-अलङ्कारस्य उदाहरणं किम् ?

(ख) उपमा-अलङ्कारस्य लक्षणं किम् ?

(ग) रूपक-अलङ्कारस्य लक्षणं किम् ?

(घ) "भवेत् सम्भावनोत्प्रेक्षा ............... परात्मना।" (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)





www.mseducationtv.com

## खण्डः 'ग'

### (पठित अवबोधनम्)

5. अधोलिखितपद्यांशस्य सप्रसङ्गसरलार्थं हिन्दीभाषया लिखत — 1 × 4 = 4

देवागारे पिहितद्वारे

तमोवृतेऽस्मिन् भजसे कम् ?

त्यज जयमालां त्यज तव गानम्

नास्त्यत्रेशः स्फुटय दृशम्।।

अथवा

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।

6. अधोलिखितगद्यांशस्य सप्रसङ्गसरलार्थं हिन्दीभाषया लिखत — 1 × 4 = 4

एतेन प्रातिवेशिक-गृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम्। तेन च सा नीता। ततः पुनस्तां मार्गतयो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति, रदनिके ! किम्मम एतया मृत्तिकाशकटिकया ? तामेव सौवर्णशकटिकां देहि इति।

अथवा

तात ! सोमधरः मम सुहृदस्ति। स पठनेऽपि तीक्ष्णः। मय्यतितरां स्निह्यत्यसौ। तस्मादावयोः प्रगाढा मित्रता। स गणिते मम साहाय्यं करोति।

7. अधोलिखितासु सूक्तिषु मात्र *द्वयोः* सूक्त्योः भावार्थं हिन्दीभाषया लिखत — 2 × 2 = 4

(क) अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

(ख) पश्य, इतोऽग्रे तस्यामसभ्यवसतौ न गमिष्यसि।

(ग) भवान् न जानाति राजपथवृत्तम्।

(घ) भो जागृतास्मि क्व धनुः क्व-खड्गः उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः।



www.mseducationtv.com

अथवा

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत् —

स्वबाहुबलमाश्रित्य योऽभ्युज्जीवति मानवः।
स लोके लभते कीर्तिं परत्र च शुभां गतिम्।।

अन्वयः –

यः (1)..................... स्वबाहुबलं (2) ............ अभ्युज्जीवति, स (3) .............. कीर्तिं परत्र च (4) ............... गतिम् लभते।

मञ्जूषा

| |
|---|
| शुभां, मानवः, आश्रित्य, लोके |

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत (केवलं प्रश्नत्रयम्) — 3 × 1 = 3

उत्तिष्ठ भो जागृहि सर्जयाग्नीन्
साक्षाद्धि तेजोऽसि परस्य शौरेः।
वक्षःस्थितेनैव सनातनेन
शत्रून्हुताशेन दहन्नटस्व।।

प्रश्नाः –

(क) कान् सर्जय ?
(ख) त्वं परस्य शौरेः किम् असि ?
(ग) शत्रून् केन दहन् नटस्व ?
(घ) 'साक्षाद्धि' इत्यस्यपदस्य सन्धिविच्छेदः किम् अस्ति ?

9. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत (केवलं प्रश्नत्रयम्) — 3 × 1 = 3

अथ कदाचित् सत्त्वानां भाग्यवैकल्यात् प्रमादाच्च सम्यक् देवो न ववर्ष। वृष्टेः अभावे तत् सरः कदम्बकुसुमगौरेण नवसलिलेन यथापूर्वं न परिपूर्णम् जातम्। क्रमेण च उपगते निदाघकाले दिनकरकिरणैः अभितप्तया धरण्या, ज्वालानुगतेनेव मारुतेन पिपासावशादिव प्रत्यहं आपीयमानं तत् सरः लघुपल्लवमिवाभवत्। तत्रस्थिताः मीनाश्च जलाभावात् मृतप्रायाः इव सञ्जाताः। सलिलतीरवासिनः पक्षिणः वायसगणाः च यावत् तान् मत्स्यान् भक्षयितुं चिन्तयति स्म तावद् विषाददैन्यवशगं मीनकुलमवेक्ष्य बोधिसत्त्वः करुणायमानः चिन्तामापेदे।

प्रश्नाः –

(क) केषां भाग्यवैकल्यात् प्रमादाच्च सम्यक देवो न ववर्ष ?
(ख) के मत्स्यान् भक्षयितुं चिन्तयति स्म ?



P.T.O.

www.mseducationtv.com

(ग) मीनाः जलाभावात् कीदृशाः सञ्जाताः ?

(घ) 'सलिलेन' – अत्र का विभक्तिः ?

10. कोष्ठकात् – उपयुक्तशब्दं चित्वा रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत (केवलं ***चत्वारः*** प्रश्नाः) — 4 × 1 = 4

(क) अस्माकं आकूतिः समानी स्यात्। (कीदृशी/किम्)

(ख) जातकमालायाः लेखकः आर्यशूरः अस्ति। (कया/कः)

(ग) विदुरा राजसंसत्सु विश्रुता आसीत्। (कुत्र/केन)

(घ) रोहसेनः आर्यचारुदत्तस्य पुत्रः आसीत्। (कया/कस्य)

(ङ) स्निग्धं भोजनं इन्द्रियाणिदृढीकरोति। (कीदृशं/केषाम्)

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया ***एकपदेन*** लिखत (केवलं प्रश्न ***चतुष्टयम्***) — 4 × 1 = 4

(क) प्राचीनतमः वेदः कः ?

(ख) कादम्बरी कस्य रचना अस्ति ?

(ग) रामायणस्य रचयिता कः ?

(घ) महाभारतस्य रचयिता कः ?

(ङ) शिवराजविजयस्य रचयिता कः ?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया ***एकपदेन*** लिखत (केवलं प्रश्न ***चतुष्टयम्***) — 4 × 1 = 4

(क) रामायणे कति श्लोकाः सन्ति ?

(ख) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ?

(ग) 'आहारविचारः' इति पाठः कस्माद् ग्रन्थाद् उद्धृतः ?

(घ) 'रघुवंशम्' इति महाकाव्यस्य रचयिता कः अस्ति ?

(ङ) 'परोपकाराय सतां विभूतयः' पाठः कस्मात् ग्रन्थाद् संकलितः ?

## खण्डः 'घ'

## (अनुप्रयुक्त-व्याकरणम्)

13. (क) वृद्धिसन्धेः ***अथवा*** व्यंजन-सन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2

(ख) कर्मकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2

(ग) द्वन्द्वसमासस्य ***अथवा*** द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2



www.mseducationtv.com

## खण्डः 'ङ'

(पाठाधारिताः बहुविकल्पीयाः प्रश्नाः)

14. अधोलिखितेषु निर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत — 17 \ 1 = 17

(i) "त्यक्त्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) ल्यप् (ख) क्त्वा

(ग) तुमुन् (घ) क्त

(ii) "यद्यस्माकम्" इत्यस्य पदस्य सन्धि विच्छेदः अस्ति –

(क) यत् + अस्माकम् (ख) यदि + स्माकम्

(ग) यदि + अस्माकम् (घ) यदि + असमाकम्

(iii) 'जयः + अस्तु' इत्यत्र कः सन्धिः ?

(क) स्वर संधिः (ख) व्यंजन सन्धिः

(ग) विसर्ग सन्धिः (घ) वृद्धि सन्धिः

(iv) 'भग्नावशेषः' इत्यत्र कः सन्धिविच्छेदोऽस्ति ?

(क) भग्न + अवशेषः (ख) भग्न + अशेषः

(ग) भग्ना + शेषः (घ) भग्ना + अवशेषः

(v) "अदीनाः' इत्यत्र कः समासः ?

(क) अव्ययीभावसमासः (ख) नञ् तत्पुरुषसमासः

(ग) द्वन्द्वसमासः (घ) कर्मधारय समासः

(vi) 'चन्द्रमुखः' इत्यत्र समासविग्रहोऽस्ति –

(क) चन्द्रइव मुख (ख) चन्द्रमुखी

(ग) चन्द्राणां मुखानि (घ) चन्द्रइव मुखं यस्य

(vii) 'मीनः' इत्यस्य पदस्य पर्यायपदं किम् ?

(क) खगः (ख) काकः

(ग) मत्स्यः (घ) खगाः

(viii) 'वेदः' इत्यस्य पदस्य पर्यायपदं किम् ?

(क) साहित्यम् (ख) श्रुतिः

(ग) स्मृतिः (घ) काव्यम्

(ix) 'दीनाः' इत्यस्य पदस्य विलोमपदं किम् ?

(क) आदीना (ख) अदीना

(ग) अदीनाः (घ) दीना

P. T. O.



www.mseducationtv.com

(x) "अमित्रान्" इत्यस्य पदस्य विलोमपदं किम् ?

(क) अमित्र (ख) शत्रु

(ग) मित्र (घ) मित्रान्

(xi) "गृहीत्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) क्त्वा (ख) तुमुन्

(ग) क्त (घ) ल्यप्

(xii) "नाशयितुम्" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) तुमुन् (ख) क्त

(ग) क्त्वा (घ) तव्यत्

(xiii) "अलम्" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) पंचमी (ख) तृतीया

(ग) प्रथमा (घ) द्वितीया

(xiv) "नमः" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) प्रथमा (ख) चतुर्थी

(ग) द्वितीया (घ) तृतीया

(xv) 'विनष्टा माता' अत्र विशेष्यपदं किम् ?

(क) पिता (ख) माता

(ग) नष्टा (घ) विनष्टा

(xvi) 'प्रगाढा मित्रता" अत्र विशेषणपदं किम् ?

(क) प्रगाढा (ख) मित्र

(ग) मित्रता (घ) प्रगाढ

(xvii) "उष्णं भोजनं" – अत्र विशेष्यपदं किम् ?

(क) उष्णं (ख) भोजन

(ग) उष्ण (घ) भोजनं



www.mseducationtv.com